# Ratikritam 1 Shiva Stotram

# રતિકૃતં ૧ શિવસ્તોત્રમ્

## Document Information

Text title : Ratikritam 1 Shiva Stotram

File name : ratikRRitaM1shivastotram.itx

Category : shiva, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 185/142-152||

Latest update : December 25, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2025

*sanskritdocuments.org*

Ratikritam 1 Shiva Stotram

# રતિકૃતં ૧ શિવસ્તોત્રમ્

રતિશ્ચાપિ તદા શમ્ભું જગામ શરણં તતઃ ।
ઉદ્ધૂલ્યગાત્રં શુભ્રેણ હૃદ્યેન સ્મરભસ્મના ॥ ૧૪૨॥

જાનુભ્યામવનિં ગત્વા પ્રોવાચ દુઃખસાગરા ।
નમોઽસ્તુ શમ્ભવે નામ્ના કર્મણા દુઃખદાય ચ ॥ ૧૪૩॥

નમસ્તે પાર્વતીસ્મર્ત્રે રત્યા વિલાપકારિણે ।
સતીમૃગાય નમઃ કાદાચિત્કયોગિને નમઃ ॥ ૧૪૪॥

નમો માયાદ્યધિષ્ઠાય માયાહીનાય તે નમઃ ।
નમો બ્રહ્મસ્વરૂપાય કૃષ્ણરૂપાય તે નમઃ ॥ ૧૪૫॥

નમો વૈરાજરૂપાય સદાશિવાય તે નમઃ ।
નમઃ શિવાય રુદ્રાય લિઙ્ગરૂપાય તે નમઃ ॥ ૧૪૬॥

નમો જ્યોતિઃસ્વરૂપાય શતરુદ્રાય તે નમઃ ।
નમસ્તે કોટિરુદ્રાય નમઃ કૈલાસવાસિને ॥ ૧૪૭॥

નમસ્તે દ્વિસ્વરૂપાય દુઃખવિરહિણે નમઃ ।
સતીનાથાય શાન્તાય યોગિને તે નમોનમઃ ॥ ૧૪૮॥

નમો વૃષભરૂપાય શરભાય ચ તે નમઃ ।
નમઃ કિરાતરૂપાય વિવસ્ત્રાય ચ તે નમઃ ॥ ૧૪૯॥

બ્રાહ્મણીષુ ભિક્ષુકાય રતિરામાય તે નમઃ ।
અનઙ્ગાય મહાઙ્ગાય જીવનાય ચ તે નમઃ ॥ ૧૫૦॥

નમસ્તેઽસ્તુ સકામાય ધ્વસ્તકામાય તે નમઃ ।
નમસ્તેઽસ્તુ શરણ્યાય ભક્તેષ્ટદાય તે નમઃ ॥ ૧૫૧॥

નમોઽસ્ત્વસહ્યકોપાય પ્રિયાઽઽમિદાય તે નમઃ ।
પ્રયચ્છ કામદ્રવ્યં મે કથં જીવે પતિં વિના ॥ ૧૫૨॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને
૧૮૫-અધ્યાયાન્તર્ગતં રતિકૃતં શિવસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૧૮૫/૧૪૨-૧૫૨॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 185/142-152..

Proofread by PSA Easwaran

*Ratikritam 1 Shiva Stotram*

pdf was typeset on December 25, 2025

Please send corrections to *sanskrit@cheerful.com*